शेषार्थविचारः

पूर्णिमा केलकर

कर्मादीनि कारकाणि षट्। तदतिरिच्य सप्तमः कारकविशेषो भर्तृहरिणा प्रतिपाद्यते। स एव कारकभेदो हरिणा शेषाधिकारे षष्ठ्यर्थ इति विस्तरेण प्रत्यपादि। स एव सम्बन्धरूपो भवति। सम्बन्धस्यापि कारकत्वमुररीकरोति हरिः। तथा च शेषषष्ठ्याः कारकषष्ठ्याश्च कथं विवेक इत्यस्मिन् लेखे निरूप्यते।

सा धनं विधुविभूषणस्य या साधनं मम करोतु मानसे
साधनं सकलसम्पदामियं याऽधनं खलु करोति साधनम्।

(वाक्यपदीये हेलाराजः साधनसमुद्देशे 156)

कर्मादिकारकषट्कातिरिक्तः सप्तमः कारकभेदः षष्ठ्यर्थ इति भर्तृहरिणोक्तम्। सोऽयं कारकविशेषः षष्ठ्यर्थ इति ग्रन्थकारेण शेषाधिकारे विस्तरेण विचारितः। षठ्यर्थ एव शेषरूपः सम्बन्ध इत्युच्यते। वस्तुतः स्वस्वामिभावादि-सम्बन्धः कारकप्रातिपदिकार्थव्यतिरिक्तः क्रियया सह न सम्बध्यते। यथा राजपुरुषः इत्यादौ राज्ञः पुरुषः इति विग्रहे षठ्यन्तस्य राज्ञः इति पदस्य क्रियया सह योगो न सम्भवति अतः कथं तस्य कारकत्वं स्वीकार्यम्। क्रियान्वयित्वं हि कारकत्वमिति स्वीकारात्। तदत्र षष्ठ्यन्तस्य राज्ञः इत्यस्य कारकत्वं कथं सम्भवेत्? राज्ञः इत्यस्य पदस्य क्रियया सह सम्बन्धाभावात्। कौमुदीकारैरपि षष्ठी शेषे इति सूत्रवृत्तौ स्पष्टमुक्तम्—कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः। तस्मिन् वाच्ये षष्ठीति। भाष्यकारस्तु कारकाणामविवक्षैव शेष इति स्वीकरोति। वाक्यपदीयकारः पुनः सम्बन्धस्यापि क्रियाकारकपूर्वकत्वात् सम्बन्धत्वं प्रतिपादयति— तदुच्यते— सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः। श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते। अयं सम्बन्धः कदाचिच्छ्रुतायां क्रियायामभिधीयते कदाचिच्च अश्रुतायां क्रियायाम्। तद्यथा—मातुः स्मरति—सर्पिषो जानीते। इत्यादौ श्रुता क्रिया। राज्ञः पुरुषः इत्यादौ अश्रुतायां क्रियायां सम्बन्धाभिधानम्। तदेवं वाक्यपदीयकारः सम्बन्धस्यापि

(षष्ठ्यर्थस्यापि) कारकत्वं स्वीकरोति।

वस्तुतः क्रियामन्तरेण सम्बन्धोऽपि नोपपद्यते। तथाहि राज्ञः पुरुषः इत्यादौ राज्ञि कर्तृत्वं पुरुषस्य सम्प्रदानत्वमनुभवसिद्धम्। राजा हि पुरुषाय धनं वा द्रव्यं वा ददाति तेन राजनि दानक्रियायाः कर्तृत्वं पुरुषे सम्प्रदानत्वं गम्यते। एवं हि क्रियाकारकभावपूर्वको राज–पुरुषयोः स्वस्वामिभावरूपसम्बन्धः शेषाख्यः षष्ठ्याभिव्यज्यते। वृक्षस्य शाखा इत्यादौ लोकप्रसिद्धया वृक्षोऽधिकरणम्। देवदत्तस्य गौरित्यादौ प्रतिग्रहणादिभिः देवदत्तस्य कर्तृत्वं प्रतीयते। नटस्य शृणोति– मातुः स्मरति– भगवतो नारायणस्य अनुकरोति इत्यादिषु वाक्येषु नटादौ कर्मत्वं विद्यते तथापि कर्मत्वस्य अविवक्षया षष्ठी भवति। अत्रेदं विचारणीयं यद् विद्यमानं वस्तु स्थितिमद किञ्चिद् द्रव्यजातं वा कथमविवक्षितं स्यादिति। कथं नाम सतोऽविवक्षा? यद् वस्तु विद्यमानं वस्तु वर्तते तस्यैव विवक्षापि भवति विवक्षिते सति स्व– निमित्तां विभक्तिं प्रसूते। अस्मिन् विषये समाधीयते भाष्यकारैः– कथं पुनः सतो नामाविवक्षा? सतोप्यविवक्षा भवति। यथा लोके– अलोमिकैडिका–अनुदरा कन्या इत्यादयः प्रयोगाः दृश्यन्ते। अत्र अलोमिकेत्युक्ते सत्स्वपि लोमसु अतिविरलत्वात् लोम्नामसत्–कल्पानि लोमानि तस्याः सन्तीत्याशयो वक्तुः। अत एव अलोमिकेत्यभिधानं भवति। तथैव अनुदरा कन्या–इत्यादौ विद्यमानेऽप्युदरे अति सूक्ष्मत्वात् अनुदरेति प्रयोगः साधुः। उभयत्रापि अल्पार्थे नञ् प्रयुक्तः। तथा च विद्यमानस्यापि उदरस्य लोम्नां वा अविवक्षा सम्भवति। एवमेव शास्त्रेऽपि विद्यमानमपि कर्म अविवक्षितत्वात् षष्ठीं प्रयोजयति। कदाचिदसतोपि विवक्षा सम्भवति। तद्यथा–समुद्रो कुण्डिका–विन्ध्यो वर्धितकम्। अत्र कुण्डिकायां समुद्र इति प्रयोगो नानुपन्नः। क्व समुद्रो विशालतमः क्व च कुण्डिका अल्पीयसी? तथापि कुण्डिकायाः अति प्रशस्ततया विशालतया वा तस्यां समुद्र इति व्यवहारः उपपद्यते। वर्धितकं नाम अन्नराशिः तस्य अति विशालत्वात् विन्ध्यपवर्तसंज्ञा भवति।

तदित्थं शेषपदं द्विविधं व्याख्यातम्। भाष्यकारादिभिः कारकाणामविवक्षा शेषः इति स्वीकृतम्। सतामपि कर्मादीनां कथमविवक्षासम्भव इति दृष्टान्तैर्व्याख्यातम्। अयमेव शेषपदार्थः स्वस्वामिभावादिसम्बन्धरूपेण अभिधीयमान षष्ठीविभक्तिं प्रयोजयति। नव्यानां मते शेष इत्यस्य स्वस्वामिभावादिसम्बन्ध एवार्थः। स च कारकप्रातिपदिकार्थव्यतिरिक्तः सन् षष्ठीं प्रयोजयति।

निष्कर्षतः सम्बन्धार्थे षष्ठीति सूत्रार्थे निष्पन्ने पुनरिदं विचार्यते सम्बन्धो हि द्विष्ठः तर्हि कस्मात् षष्ठी विधेया? राज्ञःपुरुषः इत्यादौ राजपुरुषयोर्मध्ये स्वस्वामिभावादिः सम्बन्धो विद्यते। तस्य सम्बन्धस्य बोधिका षष्ठी राजन् पदाद् विधेया आहोस्वित् पुरुषपदादिति प्रश्नः। मञ्जूषाकारैः स्पष्टमुक्तम्–द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु

भेदकात्। भेदको नाम विशेषणम्। षष्ठीविभक्तिः विशेषणादेव भवति नतु विशेष्यात्। विशेष्यात् तु प्रथमैव भवति। यदि उभयोः विशेषण –विशेष्याभ्यां युगपत् षष्ठी उत्पद्येत तदा उभयाभ्यां सम्बन्धिभ्यां षष्ठीद्वये सम्बन्धद्वयं प्रतीयेत। अतः एकैव षष्ठी विशेषणात् क्रियमाणा सम्बन्धस्य वाचिका भवति। अस्मिन् अभियुक्तानां मतं ग्राहयम्। ते उपदिशन्ति–शेषो नाम परार्थः इति। राज्ञः पुरुषः इत्यत्र विशेषणस्य परार्थत्वात् शेषभाव इति ततः षष्ठी भवति। यदा तु द्वावपि विशेषणीभूतौ भवतः तदा द्वाभ्यामपि षष्ठी भवत्येव। यथा– राज्ञः पुरुषस्य गृहम् इत्यादौ प्रतीयमानः स्वस्वामिभावरूपः सम्बन्धो वाक्यार्थ एव। पुरुषे प्रतीयमानो यः सम्बन्धः स केवलं प्रातिपदिकार्थः। स च वाक्यार्थबलात् प्रतीयते। पुरुषशब्दात् प्रातिपदिकार्थमात्रे प्रथमैव भवति। पुरुषे प्रतीयमानः प्रातिपदिकार्थः अन्तरङ्गः तत्र भासमानं विशेषत्वं राज्ञःपदसन्निधानात् गम्यते। अतः तद् बहिरङ्गम्। सारतः पुरुषशब्दात् प्रथमैव सिद्धा। राजनि सम्बन्धरूपं यदाधिक्यं तत् पुरुषशब्दसंसर्गमन्तरेणापि प्रतीयते। राज्ञः पुरुषस्य कम्बलः अथवा राज्ञः पुरुषस्य गौरित्यादिप्रयोगे एकस्यैव पुरुषपदस्य पर्यायेण गुणप्रधानभावोऽभिलक्ष्यते। अत्र पुरुषे द्वौ धर्मौ १–प्राधान्यप्राधान्यं च। राजनिरूपितं प्राधान्यम् कम्बलनिरूपितमप्राधान्यम्। यथा लोके स्वपुत्रेण सहागतः पुत्रः इत्युक्ते सहयोगे पुत्रशब्दात् तृतीया भवति। वाक्येऽस्मिन् पुत्रशब्दोऽप्रधानः आगमनक्रियां प्रति पितुरेव प्राधान्यम्। तथापि स एव पुत्रशब्दःस्वपुत्रेण इति समासे प्राधान्यं भजते।

षष्ठी शेषे इति सूत्रे शेषपदस्य प्रयोजनविषयेऽपि विचारः कर्तव्यः। अन्यत्र कारकेषु कर्मणि द्वितीया–कर्तृकरणयोस्तृतीया–इत्यत्र कर्मणि द्वितीयैव कर्तृकरण-योस्तृतीयैव नान्यत्रेति प्रत्ययनियमोऽवगम्यते। तद्वदत्रापि शेष एवार्थे षष्ठी अन्यत्र कर्मादौ नेति नियमबोधनाय शेषग्रहणं सूत्रे आवश्यकम्। अर्थनियमपक्षे अर्थाः नियताः भवन्ति प्रत्ययाः (विभक्तयः) अनियताः सन्ति। तदा षष्ठी –इत्येवन्मात्रं सूत्रं नियमार्थं भविष्यति। यत्र षष्ठी चान्या च विभक्तिः प्राप्नोति तत्र षष्ठ्येभवतीति नियमः। अस्मिन् पक्षे शेषग्रहणमनावश्यकम्।

इदानीमिदं विचारणीयम्–षष्ठी शेषे इति शेषत्वेनैव सर्वत्र षष्ठ्यायां सिद्धायां पुनः ज्ञोऽविदर्थस्य करणे (२-३-५१) इत्यारभ्य कृत्वोर्थप्रयोगे कालेऽधिकरणे (२-३-५८) इत्यन्तम् अष्टसु सूत्रेषु करणादीनां शेषत्वेन विवक्षिते षष्ठी विधीयते। [ज्ञोऽविदर्थस्य करणे २-३-५१ अधिगर्थदयेषां कर्मणि २-३-५२ कृञः प्रतियत्ने २-३-५३ रुजार्थानां भाववचनानामज्वरेः २-३-५४ आशिषि नाथः२-३-५५ जासि-निग्रहण- नाट-क्राथ-पिषां हिंसायाम् २-३-५६ व्यवहृपणोः समर्थयोः २-३-५७ कृत्वोर्थप्रयोगे कालेऽधिकरणे २-३-६४], ज्ञोऽविदर्थस्य॰ इति सूत्रमारभ्य कृत्वोर्थप्रयोगे॰

इत्यन्तं चतुर्दशसूत्रेषु दिवस्तदर्थस्य इत्यादिषट्सूत्रीं विहाय अवशिष्टायामष्टसूत्र्यां शेषे इति पदमनुवर्तते। तेन माषाणामश्नीयात् इव सर्वत्र षष्ठी शेषे इति सूत्रेणैव इष्टसिद्धिर्भविष्यति। अष्टसूत्र्यारम्भः निष्फल एव प्रतिभाति। तद् व्यर्थीभूय नियमाय कल्पते। नियमस्वरूपमिदम्– परिगणितेन सूत्राष्टकेन षष्ठ्येव भवति न तु तस्याः लुग्भवतीत्यर्थः। तथा च लुकः प्रयोजकीभूतः समासो न भवतीति तात्पर्यम्। समासे कृते सुपो धातुप्रातिपदिकयोरिति(२-४-७१)इति सूत्रेण षष्ठी लुप्येत। अत एव प्रतिपदविधाना षष्ठी न समस्यते इति वार्त्तिकारम्भः कृतः। भर्तृहरिणाप्युक्तम्– कारकैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः। प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये।

तदेवं शेषत्वविवक्षायां सर्पिषो ज्ञानम्– मातुः स्मरणम् इत्यादीन्यसमस्तान्येव साधूनि। शेषत्वेऽविवक्षिते हरिःस्मरणम्–इत्यादौ कर्तृ कर्मणोः कृति(२-३-६५)इति सूत्रेण कृद्योगषष्ठ्याः समासे इष्टसिद्धिरिति। शेषषठ्यां समासनिषेधेऽपि सर्वत्र कारकषष्ठ्यां सिद्ध एव समासः तर्हि किं प्रयोजनं समासनिषेधस्येति? तदुच्यते– कर्तृकर्मणोः कृति इति सूत्रेण षष्ठ्यामुत्पन्नायां षष्ठीति सूत्रेण(२-२-८) समासे गतिकारकोपपदात् कृत् (६-२-१३९) इति सूत्रेण मध्योदात्तत्वं भवति। शेषषष्ठ्याः समासे तु अन्तोदात्तत्वं स्यात्(६-१-२२०) अयमेव कारकषष्ठ्याः शेषषष्ठ्याश्च भेदः भाषायामर्थप्रतिपादनदृष्ट्या स्वराणां महत्त्वं कथं सर्वातिशायीत्यनया व्यवस्थया स्पष्टं प्रतिभाति। अत एवोक्तम् महाभाष्ये–

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्। (पस्पशा)

सरतः इदमवधेयम्– ज्ञोऽविदर्थस्य करणे इत्याद्यष्टसूत्र्यां प्रतिपदविधाना षष्ठी वर्तते। दिवस्तदर्थस्य–विभाषोपसर्गे–द्वितीया ब्राह्मणे–प्रेष्यब्रुवोर्हविषो देवता सम्प्रदाने–चतुर्थ्यर्थे बहुलं छन्दसि–यजेश्च करणे–इति षट्सु सूत्रेषु कारकषष्ठी विहिता। अतः परं कर्तृकर्मणोः कृति (२-३-६५) इत्यादिषु सूत्रेषु शेषपदस्याधिकारो निवृत्तः। अतः शेषे षष्ठीति सूत्रेण अप्राप्ता षष्ठी कृद्योगे विधीयते। कृद्योगे कर्तरि कर्मणि च षष्ठीविभक्तिर्भवति। यत्र कृद्योगे कर्तृकर्मणोरुभयोः प्रयोगः स्यात् तत्र उभयप्राप्तौ कर्मणि (२-३-६६) इति सूत्रेण कर्मण्येव षष्ठी भवति न तु कर्तरि। यथा– आश्चर्यो गवां दोहोऽगोपेन – अत्र गवामिति कर्मणि षष्ठी। जगतः कर्ता कृष्णः इत्यादावपि जगतः इति कर्मणि षष्ठी भवति। क्तस्य च वर्तमाने (२-३-६७) इति सूत्रेण वर्तमानकाले विहितस्य क्तस्य योगे षष्ठी स्यात्। राज्ञां मतो बुद्धो पूजितो वा इत्यादौ राज्ञामिति षष्ठी सिद्ध्यर्थं क्तस्येति क्तस्य च वर्तमाने (२-३-६७) सूत्रारम्भो व्यर्थः। सामान्येन कर्तृकर्मणोरित्यनेनैव (२-३-६५) षष्ठी सेत्स्यति–ठति अ वाच्यम्। न लोकाव्यय-निष्ठा-खलर्थतृनाम् (२-३-६९) इति सूत्रेण निष्ठाप्रत्ययोगे

षष्ठ्याः प्रतिषेधो भवति तस्य पुनः प्राप्त्यर्थं षष्ठीविधानार्थं वा क्तस्य चेति सूत्रारम्भः। अत्र मतिबुद्धिपूजार्थेभ्यश्च (३-२-१८८)इति सूत्रेण वर्तमाने क्तो विहितः। अधिकरणवाचिनश्च (२-३-६८) इति सूत्रमपि प्रतिषेधार्थापवादार्थमावश्यकम्। क्तोऽधिकरणे (३-४-७६) इति सूत्रेण अधिकरणे क्तो विहितः तद्योगे न लोकाव्यय ०इत्यादिना षष्ठ्याः निषेधो मा भूदिति षष्ठीविधानार्थं अधिकरणवाचिनश्चेति सूत्रारम्भ आवश्यकः। तेन इदमेषामासितम्–शयितम् वेति प्रयोगसिद्धिः।

कर्तृकर्मणोः कृति इति सूत्रेण प्राप्ता षष्ठी ल–उ–उक–अव्यय–निष्ठा–खलर्थ- तृनां प्रयोगे प्रतिषिध्यते। ल इत्यनेन लादेशा अभीष्टाः। तथा च शतृशानचौ शानन्-चानश्-कानच् क्वसु किकिनश्चेति प्रत्ययाः लादेशेषु गृह्यन्ते। वस्तुतः तृन्निति प्रत्याहार – ग्रहणम्। शतृशानचौ इति तृ शब्दादारभ्य आ तृनो नकारात् तृन् प्रत्याहारः। अनेन सूत्रेण निषेधे सति कुर्वन् कुर्वाणो वा सृष्टिं हरिः इत्यत्र सृष्टिमिति षष्ठी न भवति अपितु द्वितीयैव सिद्धयति। एवमेव उः– इत्यस्य हरिं दिदृक्षुः/हरिम् अलङ्करिष्णुः। उकः– दैत्यान् घातुको हरिः अव्ययम्– जगत् सृष्ट्वा/सुखं कर्तुम्। निष्ठा– विष्णुना हताः दैत्याः / दैत्यान् हतवान् विष्णुः। खलर्थः–ईषत्करः प्रपञ्चो हरिणा। शानन्–सोमं पवमानः। वानश्–आत्मानं मण्डयमानः। शतृ–वेदमधीयन्। तृन्-कर्ता लोकान् सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः शेषे षष्ठी तु सर्वत्र भवत्येव।

भविष्यति काले विहितस्य अकस्य (अक प्रत्ययययोगे)योगे भविष्यति काले आधमर्ण्ये चार्थे विहितस्य इनः योगेऽपि षष्ठ्याः निषेधः कर्तव्यः। तेन कटं कारको व्रजति/ओदनं भोजको व्रजति इत्यादयः प्रयोगाः सिध्यन्ति। एवमेव इन्नन्तेषु ग्रामं गमी/गामी वा। आधमर्ण्येऽर्थे– शतं दायी सहस्र दायी– इत्यादीनां सिद्धिर्भवति। (अकेनोर्भविष्यत्याधमर्ण्ययोः २-३-७०) भवता भवतो वा कटः कर्तव्यः इत्यादिषु प्रयोगेषु विकल्पेन षष्ठीविभक्तिर्भवति। तदर्थं कृत्यानां कर्तरि वा – इति सूत्रारम्भः। अनेन कर्तृकर्मणो कृतिः इति नित्यं प्राप्ता षष्ठी विकल्प्यते।

तदिदं सङ्कलनया 'दिवस्तदर्थस्य' इत्यारभ्य अधिकरणवाचिनश्चेत्यन्तं एकादश सूत्राणि कारकषष्ठीं प्रयोजयन्ति तत्र चतुर्थ्यर्थे बहुलं छन्दसि (२-३-६२) यजेश्च करणे (२-३-६३)इति सूत्रद्वयं छन्दोविषयकम्। दिवस्तदर्थस्य– (२-३-५८) विभाषोपसर्गे (२-३-५९) द्वितीया ब्राह्मणे (२-३-६०) प्रेष्यब्रुवो ० (२-३-६१)इति षट्सु सूत्रेषु तिङन्तमुदाहरति। शतस्य दीव्यति शतस्य शतं वा प्रतिदीव्यति इत्यादीनि दिव-धातोरुदाहरणानि सन्ति। तदेवं शेषषष्ठी–कारकषष्ठ्योर्विवेकः।